#5716

बटुकपंजरः

नं० १२५६

(वटुकपंजरप्रारम्भः)

व॰
पं॰
१

ॐश्रीगणेशायनमः देव्युवाच देवदेवमहादेवभक्ता
भीष्टप्रदायकः पूर्वमेसूचितंनाथब्रूहित्वंकृपयाप्रभु
नां १ पंजरंवटुकस्यैवसर्वसिद्धिप्रदायकं साधकानांहि
तार्थायप्रकाशंकुरुभैरव २ भैरवउवाच शृणुदेविप्रव
क्ष्यामिवटुकस्यचपंजरं पंजरस्यास्यदेवेशिवृहदारण्यको
ऋषिः ३ छंदोनुष्टुप्देवेशिवटुकोनामदेवता क्लींबीजं
वटुकायेतिशक्तिस्तुपरिकीर्तिता ४ प्रणवंकीलकंप्रो
क्तमागमज्ञैर्विनिश्चितम् सर्वार्थसाधनेदेविविनियोगः
प्रकीर्तितः ५ वटुकोव्याच्छिरोदेशेललाटेभैरवेश्वरः ।

कपोलौ क्षेत्रपालश्च भ्रूभागे चासितांगकः ६ खट्वांगधारी
नासायां नेत्रयोर्भूतनायकः ऊर्ध्वोष्ठे हरुनाथश्चरौष्ठेत्र्यध
रोष्ठे धनेश्वरः ७ चिबुके कुलनाथो व्यान्महेशो मुखमंडले
क्षेत्रेशो कंठदेशो व्यात्स्कंधयो र्वासिनीपतिः ८ हृदये का
मनाथो व्यात्कामयुद्धो भुजमंडले पाण्योरक्षेन्महाकालो मा
नेण्डो चांगुलीषु च ९ उदरे कालकालो व्यात्सर्वज्ञो नाभि
मंडले रक्षान्तो लिंगदेशे व्यात् अंडकोशे सुरेश्वरः १० क
ट्यां मे शूलभृत्पातु वस्तिदेशेऽप्यघांतकः घोरांतको पातु
चोर्ध्वोर्जंघे नेशात्रुतापनः ११ पादयोः पातु कंदर्पो कल्पांतो

व· चांगुलीषु च आकेशात्पादपर्यंतं पातु मां भैरवेश्वरः १२ प्र
पं· तीच्यां पातु भूतेशो याम्ये वल्लिहरोवतु प्राच्यां कालविधिः पा
२ तु उदीच्यां प्रथमेश्वरः १३ आग्नेय्यां चशिखी पातु नैर्ऋत्यां प्रे
२ तयोवतु वायव्यां प्राणदः पातु एशान्यामीश्वरोवतु १४
इतीदं पंजरं देवि सर्वमंत्ररहस्यकं पठनात्पठनाद्देवि सर्वसिद्धे।
श्वरो भवेत् १५ प्रातःकाले पठेद्यस्तु मुच्यते व्याधिबंधना
त् मानौमध्ये गते यस्तु पठनाद्धन्वान्भवेत् १६ सायंकाले
प्रपठनात्सर्वसिद्धिमवाप्नुयात् अर्धरात्रे पठेद्यस्तु शुचि
स्तद्गतमानसः साक्षाद्भैरवरूपो सो जायते भुवि मानवः पंज

र्भूर्जपत्रेषु चाष्टगंधेन लेखयेत् १८ धारयेत्कारकंठे च
वाहो शिरसि यं पुमान् तस्य सर्वार्थसिद्धिः स्यान्नात्र कार्या
विचारणा १९ शत्रुदस्युभयं नैव भूतादिजं भयं अस्य धा
रणमात्रेण साधको भुवि जायते २० अज्ञात्वा पंजरं देवि
अज्ञात्वा कूटपंजरं नाधिकारी भवेत्सोपि अजपानरकं व्र
जेत् २१ तस्मात्पठेत्सदा भक्त्या पातकान्मुच्यते ध्रुवम् २२
इति विश्वसारे बटुकपंजरं समाप्तम् ॥ शुभं ॥

व॰
पं॰
१

3


श्री रणवीर पुस्तकालय
५५
११५६
मंदिर श्री रघुनाथ